National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 237-239
© 2026 NJHSR
www.sanskritarticle.com

**लक्ष्मीश्री बेहेरा**
शोधछात्रा,साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**लक्ष्मीश्री बेहेरा**
शोधछात्रा,साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# गुल्मिनी गीतिकाव्ये प्रकृतिचित्रणम् -एकम् अध्ययनम्

**लक्ष्मीश्री बेहेरा**

**प्रस्थावना -**

संस्कृतसाहित्ये प्रकृतिः मानवजीवनस्य अविभाज्यं तत्त्वम् अस्ति। आदिकविभ्यः आरभ्य अद्यतनकविपर्यन्तं प्रकृतिवर्णनं काव्येषु प्रमुखतया दृश्यते। विशेषतया गीतिकाव्येषु कवयः स्वानुभूतिं,भावावेगं च प्रकृत्याः माध्यमेन अभिव्यञ्जयन्ति । "गुल्मिनी" गीतिकाव्यम् अपि एतादृशमेव काव्यम् अस्ति ,यत्र प्रकृतिचित्रणं रसात्मकतया,सौन्दर्यपूर्णतया च निरुपितम् अस्ति।

**गुल्मिनीकाव्यस्य संक्षीप्त परिचयः -**

गीतरचनेयं गुल्मिनीति कृतनामधेया । अमरकोषस्य रामाश्रमीटीकायामस्य शब्दस्य व्युत्पत्तिर्विहिता यथा 'गुल्मः प्रतानोऽस्त्यस्याः। शाखापत्रसञ्चयः प्रतानः'। वहु शाखा-पत्र-पुष्प-खचिता लतिकैव गुल्मिनी। गुल्मिनीयं विविधरस-भावभरितानां, विषयबाहुल्य-संवलितानां गीतानां गुल्मैः प्रतानैर्भरिता।' आचार्यहरिदत्तशर्मणः विरचितं गीतिकाव्यं भवति गुल्मिनी ।

गुल्मिनी-गीतिकाव्ये प्रकृतिः केवलं दृश्यवर्णनस्य विषयः न, अपितु सा कविहृदयस्य भावानां प्रतिबिम्बरुपेण प्रस्तुताऽस्ति। अत्र वनशोभा, पुष्पसौरभम्,विहगगानम्,निर्झरनिनादः,ऋतुवैचित्र्यम् इत्यादीनि अत्यन्तं रमणीयता चित्रितानि। कविः केवलं प्रकृतेः वर्णनं न करोति अपि च, प्रकृतिं दृष्ट्वा मानवीयभावैः संयुक्तां दर्शयति । यथा-वसन्तस्य आगमने हर्षोल्लासः, शरदि चन्द्रिकायाः शान्तभावः, वर्षासु मेघानां गर्जनं विरहव्यथाया उदीपनम्। गीतिकाव्यस्य प्रमुखं वैशिष्ट्यं ऋतूनां सजीववर्णनम् अस्ति ।

**कविपरिचयः -**

**कविपुंस्कोकिलं मत्तं, हरित्तदं न कः स्मरेत् ।**
**यस्य कूजितमात्रेण, काव्योद्यानं विजृम्भतम् ।।** (वाणीविलासिताम्)

आचार्यहरिदत्तशर्मा संस्कृत कविः अस्ति। तस्य जन्म उत्तरप्रदेशस्य हाथरसः इति ग्रामे २३.०९.१९४८ दिनाङ्के अभवत्। यः २०१८ तमे वर्षे राष्ट्रपतिसम्मानप्रमाणपत्रं, २००७ तमे वर्षे लसल्लटिकायाः काव्यस्य कृते साहित्य, अकादमीपुरस्कारं च प्राप्तवान्। उत्तरप्रदेशसंस्कृतसंस्थानम् "महर्षिव्यासपुरुष्कार" इति पुरस्कारेण पुरस्कृतः ।

आचार्य हरिदत्तशर्मणः वहवः काव्यानि लिखितवान्। तेषु-निवन्ध-निकुञ्जम्, गीतकन्दलिका, त्रिपथगा, उत्कलिका बालगीताली, आक्रन्दनम्। आधुनिक संस्कृत लघुकाव्य, लसल्लतिका, गुल्मिनी इत्यादयः।

**विषयः-**

गुल्मिनी-काव्ये विशेषतया वसन्तऋतुः अत्यन्तं मनोहरतया वर्णितः। तत्र कविः वसन्तऋतुः वर्णनं प्रसङ्गे पद्यं लिखति -**'मधुमासकथा'**

**अरुणैररुणैर्नवलैः कुसुमै-**
**र्भरिताः परितः शाल्मलिमालाः !**
**स्फुटिता मञ्जरी रसालतरौ**
**मधुपानरतास्तित्तिलिबालाः !!**

**नवसर्षप-पीतसुमावरणै-**
**र्लसिता ललिता वितता धरणी।**
**पक्वैर्गोधूम-चणक-सुफलैः**
**फलिताऽलङ्कारधरा रमणी।।**
**सर्वं मधुमासि नवं नव्यं**
**जीर्णा पतिता च पर्णमाला**
**अरुणै …………**

**गुल्मिनी /२३**

**हे जलधर ! वर्ष नाधुना भुवि**
**ह्यपसारय घटासमूहं स्वम्।**
**इति चिन्तासक्तमनाः कृषकः**
**प्रार्थयते जलद प्रसीद त्वम् ।।**
**खरतरनिदाघकाले जलदं**
**जीवनदं प्रार्थयते लोकः।**
**नववर्षणहेतोर्नवमेघं**
**याचते जलं सन्तप्तौकः ।।**

**गुल्मिनी/२४**

अर्थात्,

कवेः अत्र मधुमासकथा इति पद्ये वसन्तऋतोः अद्भुत वर्णनं दृश्येते। मधुमासकथा कवितायां वसन्तऋतोः सौन्दर्यं, नवपल्लव-पुष्पाणां विकासः, कृषकस्य वर्षाकामना च वर्ण्यते। पुष्पितवृक्षाः, लता, नवपल्लवाः फलेन भरिता वनराजिः च वातावरणं शोभयन्ति। किन्तु कविः केवलं प्रकृतेः शोभाम् एव न पश्यति, अपि तु तस्मिन्नेव नश्वरता,परिवर्तनं,जीवनचक्रं च सूचयति ।

जीवनस्य नित्यं परिवर्तनशीलता,बाल्यं-यौवनं-वार्धक्यं-मरणम् इत्यादीनि भावाः काव्ये सजीवतया प्रस्तुताः। जलस्य आवश्यकत्वं, कृषेः सफलत्वाय वर्षणस्य अनिवार्यता च कविना स्पष्टरुपेण प्रतिपादिता। वर्षाऽभावेन उत्पन्नं शोषणं, क्लेशः, शुष्कता च दर्शयन्,कविः जलदं प्रति प्रार्थनां करोति। अन्ते यान्त्रिकी-करणेन,कृत्रिमजीवनेन प्रकृतेः माधुर्यं लुप्तं जातमिति कविना शोकपूर्वकं निवेदितम् ।

पुनश्च

**'शरदि रङ्गखेला'** इति पद्ये कविः लिखति –

**अहो ! होलिका खेला शरत्काले विचित्रा केयम् !**
**विविधरसरङ्गभारैर्भृता रम्या प्रकृतिरामा हम् !!**

**अहो ! जरसीप्रदेशे दूरदेशे प्रकृतिकृतलीला।**
**शरन्नवयौवना नृत्यति मृदुस्मितव्यञ्जनाशीला ।।**

**निसर्गस्याङ्गणे नव्योत्सवः सम्पाद्यते किमयम्**
**अहो…………..**

**गुल्मिनी**

**अनल्पं ह्यल्पकालेनैव शीते यास्यति क्षीणम्**
**अहो……………………..**

**वसन्तो नायको मन्ये सकलसौन्दर्यसारं स्वम्।**
**उपाहरति स्वप्रेयस्यै तया संस्थाप्य निजसख्यम्।।**

**वनश्रीर्वासकैः सज्जा प्रतीक्षत इव प्रियं मदनम्।**
**द्रुतं पटवासचूर्णैर्लेपितं रम्यं प्रियावदनम्।।**

**४४ / गुल्मिनी**

**प्रकृति-प्राङ्गणमिदानीं जातमिव प्रेम्णः सुप्रतिबिम्बम्**
**अहो……………………**

**प्रचुरपटवास-पोटलिका इवोत्क्षिप्ता वने कैः कैः।**
**कनकजलयन्त्रधाराभिर्द्रुमा आर्दीकृतास्तैस्तैः ।।**
**विदेशे द्रुमलता-गुल्मेषु रञ्जनपर्व संवृत्तम्**
**अहो……………………**

**गुल्मिनी /४५**

अर्थात्,

कविः अत्र शरदि रङ्गखेला इति पद्ये शरदृतुः आगमनं वर्णयति। अत्र ऋतुराजः इव दृश्यते शरदृतुः। विविध वर्णयुक्तानि पत्राणि, पुष्पाणि, वृक्षाः च शोभायमानाः सन्ति। प्रकृतेः सौन्दर्यमिदानीं चरमे रुपेण दृश्यते। दूरदेशे अपि शरत्कालः स्वीयं रुपं प्रकाशितवान् अस्ति।

वनेषु पत्राणां हरितता क्षीणा जाता । तानि पत्राणि रक्तवर्णात् पीतवर्णानि च जातानि। प्रकृतेः एवं परिवर्तनं कविः तस्य वर्णविलासं चित्ररुपेण काव्ये चित्रयन्ति। सर्वं जगत् एकं शरत्कालोत्सवमिव प्रतीतिं जनयति। प्रकृतिः स्वाभाविकशोभायाः इदं चित्रं इव रचयति। ऋतुः न केवलं बाह्यशोभाम् , अपि अन्तः करणे अपि माधुर्यं वितनुते। जनाः नववस्त्रधारणं कुर्वन्ति, प्रियजनानां प्रतिक्षा अपि दृश्यते। राज्याः गीरेः रहस्यमं, काननशोभा, पल्लवितलता, गुल्मेषु रङ्गः एतत्सर्वं शरदृतोः ऐश्वर्यम् कविः वर्णितम् ।

पुनश्च,

**'आबूपर्वतश्रृङ्खला'** इति पद्ये कविः लखति –

**प्रस्फुटिताः पाषाणशिलाभ्यो वृक्षाणां सङ्घाताः।**

**शाखाबाहुभिरालिङ्ङ्गन्ति हि शैलं दोलितवाताः ।।**
**द्रुममूल-प्रस्तरयोः सङ्ग पश्यति पर्वतशृङ्खला**
**चल……………………**

**सलिलाशयाः सुभरिताः सरितः पार्वतजलप्रपाताः।**
**प्रावृषि प्रवहन्त्यतिवेगेन हि वान्ति तीव्रगा वाताः ।।**

**वर्षति घने भवति हरिताभा ह्याबूपवशृङ्खला**

**विश्वे................. गुल्मिनी/३६**

अर्थात् ,

अत्रापि कविः प्रकृतेः अति सुन्दरं वर्णनं दृश्यते। आबूपर्वतश्रुङ्खला इति पद्ये कविना विरचितः अयं काव्यं आबूपर्वतप्रदेशस्य प्राकृतिकसौन्दर्यं, वनस्पतिसंपदः, नदीनां प्रवाहः, प्रपाताः,तत्रस्थितं वनजीवनं, शान्तिपूर्णं वातावरणं च वर्णयति ।

गीरिमालायाः सौन्दर्यं, नदीनां गतिः, वर्षाकाले हरितता, शीतलतां वहन्ति वाताः च वर्ण्यन्ते । तत्र शान्तवनानि ज्ञानप्रदं वातावरणं च द्रष्टव्यं भवति ।

पाठे अन्ते कविः सत्चरित्रं, सात्त्विकतां, अध्यात्मिकशिक्षा च गीरिश्रेण्याः महत्वं दृश्यते ।

**उपसंहारः –**

समग्रतया अवलोक्यते चेत् गुल्मिनी-गीतिकाव्ये प्रकृतिचित्रणं अत्यन्तं सजीवम्, भावपूर्णम्, रससमन्वितं च अस्ति। कविः प्रकृतिम् आत्मानुभवस्य दर्पणरूपेण उपस्थाप्य गीतिकाव्यस्य माधुर्यं संवर्धितवान्।

अस्य काव्यस्य प्रकृतिवर्णनं न केवलं दृश्यरमणीयता ददाति, अपितु मानवहृदयस्य सूक्ष्मभावान् अपि प्रकाशयति। अतः गुल्मिनी-गीतिकाव्ये प्रकृतिचित्रणम् संस्कृतगीतिकाव्यपरम्परायाः एकं सुन्दरं उदाहरणम् इति निष्कर्षः स्वीक्रियते ।

**उपयुक्तग्रन्थसूचीः –**

- अमृतायनम्-राका प्रकाशनम्, प्रयागराज,२०२३
- गुल्मिनी (सुरगवी-गीति-गजल-मालिका) - राका प्रकाशनम्, प्रयागराज,२०२३